Prepp
Your Personal Exams Guide

# 2023

## Sanskrit Literature

## संस्कृत साहित्य

Time: 3 hours
समय: 3 घंटे

Maximum Marks: 200
अधिकतम अंक : 200

## Question paper specific instructions

प्रश्न प्रत्र के लिए विशिष्ट अनुदेश

1. **This paper is divided into two Sections, Section-A and Section-B.**
   ये प्रश्नपत्र दो खंडों में विभाजित है, खंड-A और खंड-B

2. **Each Section contains four (4) questions.**
   प्रत्येक खंड में चार प्रश्न है।

3. **Candidate has to attempt five questions in all.**
   परीक्षार्थी को पांच प्रश्नों का उत्तर लिखना है।

4. **Question Nos. 1 and 5 are compulsory and out of the remaining, THREE questions are to be attempted choosing at least ONE question from each Section.**
   प्रश्न संख्या 1 और 5 अनिवार्य है और शेष प्रश्नों में से किन्हीं तीन का उत्तर लिखना है, प्रत्येक खंड से एक प्रश्न को हल करना है।

5. **Word limit in questions, where specified, should be adhered to.**
   प्रश्नों में शब्द सीमा, जहाँ विनिर्दिष्ट है, का अनुसरण किया जाना चाहिए।

6. **The number of marks carried by a question/part is indicated against it.**
   प्रत्येक प्रश्न/ भाग के लिए नियत अंक उसके सामने दिए गए हैं।

7. **Questions are printed in English & Hindi languages. In case of any ambiguity in translation of any question, English version shall be treated as final.**
   प्रत्येक प्रश्न हिन्दी और अंग्रेजी दोनों भाषाओं में छपा है। प्रश्नों के अनुवाद में किसी अस्पष्टता की स्थिति में, अंग्रेजी संस्करण को ही अन्तिम माना जाएगा।

## खण्ड - अ

प्र.१ अधो लिखितानां प्रश्नानामुत्तराणि लिखतु- 5x8=40

१(अ) पञ्चनदम्, हरिहरौ, अपुत्रः, पौर्वशालः, घनश्यामः 8

१(ब) निम्नाङ्कितेषु वाक्येषु वाक्यपरिवर्तनं कुरुत- 8

(i) सा चित्रं पश्यति ।

(ii) अहं सत्यं वदामि ।

(iii) त्वया नगरे उष्यते ।

(iv) रमा विद्यालयमेति ।

(v) भवता गीतं श्रूयते ।

१(क) निम्नलिखितानां संज्ञानां ससूत्रमुदाहरणं देयम्- 8

वृद्धिः, उपसर्जनम्, करणम्, प्रातिपदिकम्, उपधा, निपातः

१(ड) त्रयाणां सूत्राणां सोदाहरणं व्याख्या कार्या- 8

उरण् रपरः, ओत्, एत्येधत्यूठ्सु, विसर्जनीयस्य सः, अतोरोरप्लुतादप्लुते ।

१(इ) सोदाहरणं व्याख्यायताम्- 8

(i) कालाध्वनोरत्यन्तसंयोगे ।

(ii) ध्रुवमपायेऽपादानम् ।

प्र.२ अधो लिखितानां प्रश्नानामुत्तराणि लिखतु-

२(अ) संस्कृतनाटकानामुद्भवविकासौ वर्णनीयौ । (20)

२(ब) महाभारतस्य सांस्कृतिकं महत्त्वं प्रतिपादयत । (20)

प्र.३ अधो लिखितानां प्रश्नानामुत्तराणि लिखतु-

३(अ) तर्कभाषानुसारेण षोढा सन्निकर्षाः प्रतिपादनीयाः । (20)

३(ब) पातञ्जलयोगमाश्रित्य ईश्वरं विवृणुत । (20)

Prepp
Your Personal Exams Guide

प्र.४ अधो लिखित गद्यखण्डात् संस्कृतभाषया उत्तरं लिखतु ।

अस्मत्समीपे सर्वत्र प्रकृतिरेव विराजते । एषा प्रतिक्षणं विलीयते आविर्भवति च पुनः अभिनवरूपेण । प्रक्रियेयं कदाचिदपि न विरमति । विलयेन साकं निर्माणक्रमस्यपि सञ्चरणात्प्रकृतिरप्यनन्ता । प्रकृतिरेषा शश्वद्विघटनशीला । अस्याः अंशाः एकैकशः प्रतिक्षणं रूपान्तरिताः भक्तास्तिष्ठन्ति । पुरुषः प्रकृतेर्संयोगविभागाभ्यामप्रभावितः एव वर्तते । एषः एव पुरुषस्य स्थायिभावः । तेन परिचालन प्रणाल्येका विकसिता या प्रकृत्या सम्बद्धा । एवमस्माभिप्रकृतावेव पुरुषस्य दर्शनं लभ्यते । जगतः गतिशीलत्वस्य आधारः प्रकृतौ पुरुषदर्शनमेवास्ति अस्यामेव गतिशीलतायां विश्वः एषः जायमानः विलीयमानश्च तिष्ठति ।

- उक्तमपठितांशमाधृत्य एते प्रश्नाः समाधेयाः **5x8=40**

(i) अस्मत्समीपे सर्वत्र का विराजते ?

(ii) जगतः विलयाविर्भावप्रक्रिया कदा विरमति ?

(iii) प्रकृतेर्संयोगवियोगाभ्यां पुरुषः प्रभावितः भवति नवेति ?

(iv) प्रकृतौ कस्य दर्शनं भवति ?

(v) जगतः गतिशीलतायाः आधारः किम् ?

## खण्ड – ब

प्र.५ अधो लिखितानां प्रश्नानामुत्तराणि लिखतु–

(अ) नैषधं विद्वदौषधम्– सूक्तिरेषा समीक्षणीया । (08)

(ब) व्याख्येया सूक्तिरेषा– 'बाणोच्छिष्टं जगत्सर्वम्' । (08)

(क) व्याख्यायताम् – 'दण्डिनः पदलालित्यम्' । (08)

(ड) समीक्ष्यताम्– 'नारिकेलफलसम्मितं वचो भारवेः' । (08)

(इ) सूक्तिमेताम् व्याख्यायताम्– 'प्रियाङ्कवालीव विमर्दहृद्या न कालिदासादपरस्य वाणी' । (08)

प्र.६ अधो लिखितानां प्रश्नानां उत्तरं लिखतु–

६(अ) श्रीमद्भगवद्गीतायामुक्तस्य 'स्थितप्रज्ञस्य' लक्षणानि विविच्यताम् । (20)

६(ब) ईशावास्योपनिषदनुसारि 'सम्भूत्यसम्भूती' वर्णयत । (20)

प्र.७ निम्नाङ्कितौ सप्रसङ्गं व्याख्येयौ– 2x20=40

(i) तं सन्तः श्रोतुमर्हन्ति सदसद्व्यक्ति हेतवः ।
हेम्नः संलक्ष्यते ह्यग्नौ विशुद्धिः श्यामिकाऽपि वा ।।

(ii) कृतारिषड्वर्गजयेन मानवीमगम्यरूपां पदवीं प्रापित्सुना ।
विभज्य नक्तंदिवमस्ततन्द्रिणा वितन्यते तेन नयेन पौरुषम् ।।

प्र.८ अधोलिखितौ सप्रसङ्गं व्याख्येयौ– 2x20=40

(i) अव्यक्तोऽयमचिन्त्योऽयमविकार्योऽयमुत्त्यते ।
तस्मादेनं विदित्वैनं नानुशोचितुमर्हसि ।।

(ii) धूमज्योतिःसलिलमरुतां सन्निपातः क्व मेघः
सन्देशार्थाः क्व पटुकरणैर्प्राणिभिर्प्रापणीयाः ।
इत्यौत्सुक्यादपरिगणयन्गुह्यकस्तं ययाचे
कामार्ता हि प्रकृतिकृपणाश्चेतनाचेतनेषु ।।